# Rashtriya Jagaranam

# રાષ્ટ્રિય જાગરણમ્

## Document Information

Text title : Rashtriya Jagaranam

File name : rAShTriyajAgaraNam.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# રાષ્ટ્રિય જાગરણમ્

(ગીતિકા) (ભુજઙ્ગપ્રયાતમ્)
અયે ભારતીયાઃ ! યતધ્વં યતધ્વં
    સુખં શાન્તિમિષ્ટા લભધ્વં લભધ્વમ્ ।
સુખં દુઃખજાતં સહધ્વં સહધ્વં
    વિકાસં પ્રમોદં ભજધ્વં ભજધ્વમ્ ॥ ૧
ઇયં ક્રાન્તિરિષ્ટા સમે ભારતેઽપિ
    પ્રચારં પ્રસારં ભજેલ્લોકહેતો ।
યુવા બાલકો બાલિકા વૃદ્ધવર્યો
    દદત્વાત્મયોગં સદા દેશહેતોઃ ॥ ૨
સદા સંવિધાનસ્ય રક્ષાપરાઃ સ્યુઃ
    સ્વદેશાભિમાનં જને જાગૃયાચ્ચ ।
જને વર્ધતામાદરો રાષ્ટ્રકેતૌ
    નરો મોદમાલા વહેદ્ રાષ્ટ્રગીતૌ ॥ ૩
સદા દેશરક્ષા, સદાઽઽદર્શ-રક્ષા
    સદૈવોચ્ચ-ભાવાશ્રયા વૃત્તિરિષ્ટા ।
વિકાસઃ પ્રકાશો ભવેદ્ ગ્રામ-મધ્યે
    જ્વલેજ્જ્ઞાન જ્યોતિઃ સમેષા મનઃસુ ॥ ૪
ભવેદ્ દેશકાર્યે સદા ચિત્ત-યોગં
    સ્વદેશોન્નતૌ સ્યાત્ સદેવાનુરાગઃ ।
વિકાસસ્ય કાર્યં મનોયોજનં સ્યાદ્
    દરિદ્રાતુરાણાં હિતં પ્રેપ્સિતં સ્યાત્ ॥ ૫
પ્રભુત્વં સ્વદેશસ્ય લક્ષ્યં સદા સ્યાદ્
    ભવેદેકતા રાષ્ટ્રવૃદ્ધ્યે જનેષુ ।
અજસ્રં વહેત્ સ્વાભિમાનસ્ય ધારા
    સદા પ્રેરિતા સ્યુર્જનાઃ દેશભક્ત્યા ॥ ૬

જને જાગૃયાદ્ ભ્રાતૃભાવો ભવાય
    સમત્વસ્ય ભાવોદયં સ્યાત્ સુખાય ।
ન ધર્મો ન ભાષા ન દેશં પ્રદેશો
    ભવેદ્ ભેદકારી, ન ચ ક્ષોભકારી ॥ ૭
યથૈવાદૃતા સ્યુર્નરાઃ લોકમધ્યે
    તથા યોષિતામાદરં સ્યાદજસ્રમ્ ।
ન યાને, ન પાને, વિવાહેઽન્યદા ચ
    સ્ત્રિયા આદરે ન્યૂનતા લક્ષિતા સ્યાત્ ॥ ૮
યથા સંસ્કૃતિર્ભારતીયાઃ પ્રથેત
    યથા ગૌરવં ભારતીયં તનોતુ ।
વિહાય સ્વકં ક્ષુદ્રભાવઃ શ્રમેણ
    મહત્ત્વં પ્રસાર્યં ભુવ સંસ્કૃતેશ્ચ ॥ ૯
ન દૈન્યસ્ય ભાવોદય સ્યાજ્જનેષુ
    ક્ષુધા-હીન-ભાવાવલિશ્ચ પ્રસર્પેત્ ।
વિલાપં ક્વચિન્ન શ્રુતં સ્યાજ્જનાનાં
    નિવાસાશ્રયો વૃત્તિ-લાભાર્થમેવ ॥ ૧૦
વિપત્તિઃ સ્વદેશે યદૈવાઽઽપતેત્તુ
    યદાઽઽહ્વાનલેશોઽપિ રક્ષાર્થમ્માયાત્ ।
તદા સઙ્ગતૈઃ સર્વમેવાવમત્ય
    નરૈર્ભારતીયૈઃ સદા ભાવ્યમેવ ॥ ૧૧
દયા-ભાવ-વૃદ્ધિર્જને જીવ-જાતે
    ગવાદેર્વિવૃદ્ધિ પશૂનાં સુરક્ષા ।
નદીનાં હ્રદાનાં વનાનાં નગાનાં
    સુરક્ષા કૃતાઃ સ્યાત્ પથામાપણાનામ્ ॥ ૧૨
વિકાસં વ્રજેદ્ ભાવના દેશભક્તે
    નરાણાં હિતાયેહિતં સ્યાદજસ્રમ્ ।
સુધારે રુચિર્જ્ઞાનવૃદ્ધૌ પ્રવૃત્તિઃ
    ભવેદ્ દૃષ્ટિકોણશ્ચ વિજ્ઞાનમૂલમ્ ॥ ૧૩
ન હિંસાશ્રયા વૃત્તિરિષ્ટા જનેષુ
    ભવેત્ સ્નેહ-ભાવોદયં સૌખ્યકારી ।
સદા સમ્પદો રક્ષિતા સ્યુર્જનાનાં
    સમાજાશ્રયા વા નરૈરાશ્રિતા વા ॥ ૧૪

તથા સ્યાદ્ વિકાસો યથા લક્ષ્યપૂર્તિ
    ભવેદ્ રાષ્ટ્રકાર્યે, ન રોધઃ ક્વચિત્ સ્યાત્ ।
સમષ્ટેશ્ચ વ્યષ્ટેર્હિતં સ્યાત્ સમાનં
    સદોત્કર્ષકારી વિકાસં શ્રિયઃ સ્યાત્ ॥ ૧૫
ભવેદ્ રાષ્ટ્રવૃદ્ધિર્જનાનાં સમૃદ્ધિં
    સુખં શાન્તિરિષ્ટા સદૈવ પ્રથેત ।
સદા સ્યાચ્ચ યૂનાં સુદૃષ્ટિઃ પ્રકર્ષે
    ગુણોચ્છ્રાયકાર્યે સમષ્ટેર્હિતાય ॥ ૧૬
યથાऽऽલસ્યલેશો ન વ્યાઘાતકારી
    ભવેત્ તાદૃશો માર્ગ એવાવલમ્બ્ય ।
ક્રિયાશીલકત્વં મહત્ત્વાભિધાનં
    ક્રિયારોધ એવાત્મઘાતાભિધેયઃ ॥ ૧૭
પ્રવૃત્તિર્નરાણાં ભવેદ્ રાષ્ટ્રકાર્યે
    રુચિઃ સ્યાજ્જનાનાં સુધારે વિકાસે ।
જનૈરાશ્રિતં સ્યાત્તુ માર્ગં પ્રશસ્તં
    સુખોદર્કં એવાસ્તુ સર્વો વિધિશ્ચ ॥ ૧૮
સ્વદેશે રતિઃ સંસ્કૃતૌ સંસ્કૃતત્વં
    સદા સ્વાભિમાનં મહત્ત્વં પ્રકૃષ્ટમ્ ।
સદાऽશાશ્રયત્વં નિરાશાક્ષયશ્ચ
    ગુણોત્કર્ષહતોર્મુદાऽऽધેયમેવ ॥ ૧૯
સ્વદેશસ્ય માહાત્મ્યમિષ્ટં ભવેચ્ચેત્
    સ્વદેહસ્ય ત્યાગો વરં દેશહેતોઃ ।
સ્વદેશાશ્રયા શ્રીર્નૃણાં જીવનં ચ
    સ્વદેશે સમૃદ્ધે સુખં સર્વમેવ ॥ ૨૦

Proofread by Mandar Mali

*Rashtriya Jagaranam*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*